योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०६२

द्विषष्टितमः सर्गः ६२

श्रीवसिष्ठ उवाच ।

परमाणुनिमेषाणां लक्षांशकलनास्वपि ।

जगत्कल्पसहस्राणि सत्यानीव विभान्त्यलम् ।। १

तेष्वप्यन्तस्तथैवान्तः परमाणुकणं प्रति ।

भ्रान्तिरेवमनन्ताहो इयमित्यवभासते ।। २

वहन्तीमाः पराः सत्ताः शान्ताः सर्गपरम्पराः ।

सलिलद्रवतेवान्तःस्फुटावर्तविवर्तिका ।। ३

मिथ्यात्मिकैव सर्गश्रीर्भवतीह महामरौ ।

तीरद्रुमलतोन्मुक्तपुष्पालीव तरङ्गिणी ।। ४

स्वप्नेन्द्रजालपुरवत्संकथेहापुराद्रिवत् ।

संकल्पवदसत्यैव भाति सर्गानुभूतिभूः ।। ५

श्रीराम उवाच ।

एकात्मैकतयैवं हि जाते सम्यग्विचारणात् ।

निर्विकल्पात्मविज्ञाने परे ज्ञानवतां वर ।। ६

किमर्थमिह तिष्ठन्ति देहास्तत्त्वविदामपि ।

दैवेनैव समाक्रान्ता दैवमत्र च किं भवेत् ।। ७

श्रीवसिष्ठ उवाच ।

अस्तीह नियतिर्ब्राह्मी चिच्छक्तिः स्पन्दरूपिणी ।

अवश्यभवितव्यैकसत्ता सकलकल्पगा ।। ८

आदिसर्गे हि नियतिर्भाववैचित्र्यमक्षयम् ।

अनेनेत्थं सदा भाव्यमिति संपद्यते परम् ।। ९
महासत्तेति कथिता महाचितिरिति स्मृता ।
महाशक्तिरिति ख्याता महादृष्टिरिति स्थिता ।। १०
महाक्रियेति गदिता महोद्भव इति स्मृता ।
महास्पन्द इति प्रौढा महात्मैकतयोदिता ।। ११
तृणानीव जगन्त्येवमिति दैत्याः सुरा इति ।
इति नागा इति नगा इत्याकल्पं कृतास्थितिः ।। १२
कदाचिद्ब्रह्मसत्ताया व्यभिचारोऽनुमीयते ।
चित्रमाकाशकोशे च नान्यथा नियतेः स्थितिः ।। १३
विरिञ्चयाद्यात्मभिर्बुद्धैर्बोधायाविदितात्मनाम् ।
ब्रह्मात्मैव सा नियतिः सर्गोऽयमिति कथ्यते ।। १४
अचलं चलवद्दृष्टं ब्रह्मापूर्य व्यवस्थितः ।
अनादिमध्यपर्यन्तं सर्गो वृक्ष इवाम्बरे ।। १५
पाषाणोदरलेखौघन्यायेनात्मनि तिष्ठता ।
ब्रह्मणा नियतिः सर्गो बुद्धोऽबोधवतेव खम् ।। १६
देहे यथाङ्गिनोऽङ्गादि दृश्यते चित्स्वभावतः ।
ब्रह्मणा पद्मजत्वेन नियत्याद्यङ्गकं तथा ।। १७
एषा दैवमिति प्रोक्ता सर्वं सकलकालगम् ।
पदार्थमलमाक्रम्य शुद्धा चिदिति संस्थिता ।। १८
स्पन्दितव्यं पदार्थेन भाव्यं वा भोक्तृतापदम् ।
अनेनेत्थमनेनेत्थमवश्यमिति दैवधीः ।। १९
एषैव पुरुषस्पन्दस्तृणगुल्मादि चाखिलम् ।
एषैव सर्वभूतादि जगत्कालक्रियादि वा ।। २०
अनया पौरुषी सत्ता सत्तास्याः पौरुषेण च ।
लक्ष्यते भुवनं यावद्द्वे एकात्मतयैव हि ।। २१
नरेण पौरुषेणैव कार्ये सत्तात्मके उभे ।

ईदृश्येतेन नियतिरेवं नियतिपौरुषे ।। २२

प्रष्टव्योऽहं त्वया राम दैवपौरुषनिर्णयः ।

मदुक्तं पौरुषं पाल्यं त्वयेति नियतिः स्थिता ।। २३

भोजयिष्यति मां दैवमिति दैवपरायणः ।

यत्तिष्ठत्यक्रियो मौनं नियतेरेष निश्चयः ।। २४

न स्याद्बुद्धिर्न कर्माणि न विकारादि नाकृतिः ।

केवलं त्वित्थमाकल्पं स्थित्या भाव्यमिति स्थिताः ।। २५

अवश्यंभवितव्यैषा त्विदमित्थमिति स्थितिः ।

न शक्यते लङ्घयितुमपि रुद्रादिबुद्धिभिः ।। २६

पौरुषं न परित्याज्यमेतामाश्रित्य धीमता ।

पौरुषेणैव रूपेण नियतिर्हि नियामिका ।। २७

अपौरुषं हि नियतिः पौरुषं सैव सर्गगा ।

निष्फलाऽपौरुषाकारा सफला पौरुषात्मिका ।। २८

नियत्या मूकतामेत्य निष्पौरुषतयाऽक्रियम् ।

यस्तिष्ठति प्राणमरुत्स्पन्दस्तस्य क्व गच्छति ।। २९

अथ प्राणक्रियारोधमपि कृत्वा विरामदम् ।

यदि तिष्ठति तत्साधुर्मुक्त एव किमुच्यते ।। ३०

पौरुषैकात्मता श्रेयो मोक्षोऽत्यन्तमकर्तृता ।

आभ्यां तु सबलः पक्षो निर्दुःखैव महात्मनाम् ।। ३१

नियतिर्ब्रह्मसत्ताभा तस्यां चेत्परिणम्यते ।

नूनं परमशुद्धाख्यं तत्प्राप्तैव परागतिः ।। ३२

एतैर्नियत्यादिमहाविलासै-

ब्रह्मैव विस्फूर्जति सर्वगात्मा ।

तृणादिवल्लीतरुगुल्मजालैः

सत्तेव तोयस्य धरान्तरस्था ।। ३३

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे लीलो० दैवशब्दार्थनिरूपणं नाम द्विषष्टितमः सर्गः ।।